श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ चरमश्लोकच्चुरुक्कु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चरमश्लोकच्चुरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सम्यग्ज्ञानेन हीना यदिह च विजहुः कर्मयोगादिकांश्च
तेष्वप्यन्यास्ववस्थास्वनुगुणविधिनोपात्तसर्वक्रियासु।
सम्यग्ज्ञानाः प्रवृत्तास्स्युरपि तदबला मां ह्युपायं न्यसेयुः
एवं सर्वांश्च धर्मान् उपदिशत उपाशिश्रयामोऽङ्घ्रियुग्मम्॥ 1॥

आकिञ्चन्यं विदित्वा तदनु तदु पुरस्कृत्य चान्याः प्रतीकाः
नापेक्ष्या इत्यवेत्योन्नतफलमिव तत् प्राप्तुमुत्पत्य खर्वः।
खिन्नस्सन्त्यज्य तच्चाप्यतिदृढचतुरास्यास्त्ररीतिं च बुध्वा
न्यस्तव्यं चैकधर्मायनमतिशयितः प्राह धर्मस्तदानीम्॥ 2॥

त्यक्त्वा क्षीरपयोनिधिं च मधुरां लक्ष्म्या सहागत्य तं
भूभारं त्ववतार्य भारतरणे भूत्वा च सूतः पुरा।
दूतोऽतीवभयार्तफल्गुनरथात् यस्तं ररक्ष स्वयम्
तस्यैतस्य हरेः पदाम्बुजमहादासा वयं स्मोऽधुना॥ 3॥

लभ्यं साधनमात्मनीनकृपया तत् साधकश्च स्वयं
प्राप्नोतीत्यपनेतुमाश्रितजनैकोपायभूतं हरिम्।
अत्यन्तस्पृहणीयया करुणया लक्ष्म्या च साकं स्तुतं
रस्योक्तिं प्रभुमभ्युपेयिम परं चेहैकवाच्यं वयम्॥ 4॥

देहे संयोज्य संभ्रामयति च दुरिताम्भोनिधौ मां निमग्नं
शेषत्वादीन् मदीयान् अपि च शुभगुणान् स्वानुरूपं सुमार्गम्।
कारुण्याब्धिस्स्वयं मे स्वमिह वितरितुं धर्म एवाद्वितीयः
नान्यं लप्स्ये यथेतः परमिह परमं मय्यभिस्निह्यतीशः॥ **5** ॥

कर्मस्वत्यन्तकृच्छ्रेष्विह पुरुषफलावाप्तिविघ्नायितेषु
स्वीकृत्याचारमस्मास्वविरतमिह तत्पूर्णविश्वासयुक्तः।
वस्त्वेतत्स्वैकरक्ष्यं न्यसनकरणतश्चैकदैवातिहृष्टः
गीताचार्यो व्रजेति श्रितमुवद तदाऽलम्भयच्चात्मपादौ॥ **6** ॥

वेद्यो दुर्ज्ञेयवेदैः पर इति सकलात् यस्स्वयं चाधुना स्वं
मर्त्याकारं य एवं न विदुरिह तदावेदनात्तप्रभावः।
सार्धं तैर्नित्यसङ्घैस्त्ववतरति जगत्युत्तमः पूरुषोऽहं
शब्दार्थः श्रीप्रियोऽस्मान् निजपरमपदं प्रापयत्येव भक्तान्॥ **7** ॥

आत्मीयां दर्शयित्वा स्थितिमतिमुदितश्चासहायान् विलोक्य
तामस्माकं ह्यपोढुं स्थितिमिह परिगृह्यात्मरक्ष्यान् प्रपन्नान्।
आत्माङ्घ्री ह्येव दातुं विविधगतियुते मूलवर्णे शताङ्गे
पार्थस्याप्यास्थितोऽस्मान् उपकृदुपगतान् स्वीचकाराद्यधर्मान्॥ **8** ॥

पादाभ्यां च तदा जघान शकटं यश्चाभवत्सारथिः
चक्रे न्यस्तभरांश्च नो विघटकान्यस्माकमेनांसि च।
आरण्यान्युत नारकानुत महाक्ष्वेडौघमाहोऽनलं
सोष्णां वा दुरपोढगाढतिमिरां रात्रिं समीयुर्ध्रुवम्॥ **9** ॥

संन्यस्तात्मीयभारात् परमिह जनितैनांसि नो मोचयित्वा
पद्धत्याऽर्चिःप्रभृत्या परमपदमसौ प्रापयन् मोदमानैः।
तत्रत्यैः नित्यमुक्तैः रमयितुमनिशं त्वद्य चेदद्य एव
श्वश्चेत् श्वश्चैव संकल्पत उरुकरुणो मोक्षयन् त्रायते नः॥ **10** ॥

स्वीकुर्वन् नः प्रपन्नान् धुतसकलमतीन् आत्मसंरक्षणीयान्
बन्धूक्त्यर्हान् समस्तान् स्वयमिह विधरन्नस्मदर्थं हि भूत्वा।
दुःखं माभूत् पुनर्भूकृतमिति हृदयं चाजहत्संवसंश्च
स्वामी सर्वाणि दुःखान्यतिशयकृपया भोग्ययाऽनाशयन्नः॥ **11** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धस्थः चरमश्लोकसङ्ग्रहः।
सश्लोकस्सार्थतात्पर्यः कृतो गोपालसूरिणा॥

॥ इति चरमश्लोकसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥